अथ केशवदैवज्ञविरचिता न
वात्मिका व्याख्यानोदाहरण
ऽऽरभ्यते ॥ अथातः केशवी
क्षां व्याख्यास्यामः ॥

नत्वा गणपतिं देवं परिभाषाङ्कसूचकम्
च्यते केशवेनेदं वेदाध्यायिसुखाप्तये ॥ १ ॥ द
माध्यन्दिनीयपरिभाषा ॥ अङ्कानां नवानां
णां मध्ये येन सूत्रेण पदादिमध्यान्तवर्णेषु सञ्ज्ञा
यते तद्विना पदादिवर्णेष्वेव सञ्ज्ञा न जायते
च्यते ॥

पदादौ पूर्व्वाहल्व्योर्द्वित्र्योश्चारौ
म्पूर्व्वयोश्छन्दसि ॥१ ॥

माध्यन्दिनीये पदादौ आद्यहल्विहीनयोर्व व
कारयोः सम्पूर्वयोश्चाध्ययनयोः क्रमाद्द्वित्त्ववका र
रोच्चारः स्याच्छन्दसि ॥ हल् इति व्यञ्जनम्। अस्यो
रणानि संहितायाः प्रथमाध्याये प्रथमकण्डि
वायवस्थऽइत्यत्र व्यायवइत्युच्चारः। तथैव द्वितीयव

कायां वसोः पवित्रमित्यत्र व्वसोः पवित्रमित्युच्चारः। प्रथमर्चि यजमानस्येत्यत्र यृजमानस्येत्युच्चारः। द्वितीयर्चि यज्ञपतिरित्यत्र यृज्ञ्ञपतिरित्युच्चारः। कस्त्वा युनक्तीत्यत्र युनक्तीत्युच्चारः। सम्पूर्वकस्योदाहरणानि संहितायाम्प्रथमाध्याये दैवस्य त्वेतृङ्मध्ये संवपामीत्यत्र सँव्वपामीत्युच्चारः। संवर्च्छसेत्यत्र सँव्वर्च्छसेत्युच्चारः। जनयत्यै त्वा सँय्यौमीत्यत्र सँय्यौमीत्युच्चारः। संयज्ञपतिरित्यत्र सँय्यज्ञ्ञपतिरित्युच्चारः। इत्यादिषु पदादित्वात्सम्पूर्वत्वाच्च यवयोर्द्वित्ववकारयकारौस्तः। न वयकारौ इत्यादि सर्वत्र ज्ञेयम्। पदादाविति किम्। आद्यकण्डिकायां प्रजावतीरनमीवाः। प्रार्प्यतु श्येष्टतमायेत्यादिषु वकारमकारयोः पदादित्वाभावान्न द्वित्ववकारयकारौ स्तइति। आद्यहल्विहीनयोरिति किम्। द्वितीयाध्याये 'अग्ने व्वाजजिद्वाजन्वा। तृतीयाध्याये अव रुद्रमित्यृङ्मध्ये श्रेयसस्करद्यथा न इत्यनयोर्वकारयकारयोः पदादित्वमस्त्यतो द्वित्वजकारोच्चारः। अनयोरुदाहरणयोस्तु आद्यदकारहल्युक्तत्वान्न द्वित्वजकारोच्चारो न द्वित्ववकारोच्चारश्चेति प्रथमसूत्रव्याख्या जकारोच्चारणार्थमन्यत्सूत्रं च प्रदर्श्यते॥

पदान्तमध्यऋहरेफयुग्यस्य यश्च॥२॥

पदान्तमध्ये ऋकारहकाररेफैश्च युक्तस्य यस्य व
श्चारणं छन्दसि माध्यन्दिनीये । उदाहरणानि
विंशतिमेऽध्याये प्रथमा द्वितीयैरित्येकादशकण्डिका
सामान्यृभिः । द्वितीयाध्याये यम्परिधिमित्यङ्गम
पणिभिर्गुह्यमानइत्यत्र हकारजकारयुक्तोच्चारः ।
दोऽसि येनेतिकण्डिकायां मह्यँवेदो भूयाः । घृ
चीस्थो धुर्य्यौ । तृतीयाध्याये उपत्वेत्यङ्गमध्ये घृ
चीर्य्यन्तु हर्य्यत इत्यादिषु ऋकारहकारेफयुक्तो
ज्जकारोच्चारो न यकारः । ऋहरेफयुक्तस्येति कि
मभिषिञ्चत्युत्सिञ्चन्ति । अत्र न जकारोच्चारः ।
तः ऋहरेफयुक्तत्वाभावात् । एवमन्यत्रापि बोध्य
इति द्वितीयसूत्रव्याख्या । सूत्रद्वयार्थे कारिकार्ध
पूर्वोक्तव्योः पदादौ च वेदे सम्पूर्वयोर्द्विजौ ॥ यर
रेफयुक्तस्य जः पदाद्यन्तमध्यके ॥

षः खष्टुमृते च ॥ ३ ॥

पदान्तमध्ये षकारस्य खकारोच्चारस्यात्टवर्गं
जा छन्दसि माध्यन्दिनीये । उदाहरणानि । इषे
र्जेत्वेत्यत्र खकारोच्चारो न षकारः । एवं
सूत्रेऽपि "इयं पृथिवी सर्वेषां भूतानामित्यत्र क
यखकारसदृशोच्चारो न मूर्द्धन्यषकारइति । टवर्ग
नेति किम् । आद्ये ऋचि "अष्टतमाय कर्म्मणे" इ

टवर्गयुक्तत्वात्षकारोच्चारएव न खकारोच्चारइत्यादि सर्वत्र ज्ञेयम् ॥ इति तृतीयसूत्रं व्याख्यातम् ॥

अहल्शल्यूर्ध्वरेफस्य सैकारः प्राक्च ॥ ४ ॥

पदान्तमध्ये हल्विहीनशल्यूर्ध्वरेफस्य सैकारः प्रागुच्चारश्छन्दसि माध्यन्दिनीये ॥ शल्इति शषसहा ज्ञेयाः । उदाहरणानि यथा । अष्टचिंशदध्याये सप्तदशकण्डिकायां अभीमं महिमा दिवमित्यत्र दर्शतमित्यूर्ध्वरेफस्य प्रागेव सैकारोच्चारः। दरेशतमिति न तु सोर्ध्वरेफोच्चारः । एकोनचत्वारिंशदध्याये अग्निर्ट० हृदयेनाशनिमित्यङ्मध्ये पर्शव्येनेत्यत्र परेशव्येनेत्युच्चारः ॥ पञ्चमाध्याये "द्यावा" इति कण्डिकायां शतवल्शो विरोह सहस्रवल्शा इत्यत्रापि रलयोः सावर्ण्यात्लस्यापि प्राक्सैकारोच्चारः, शतवलेशो विरोह सहस्रवलेशा इति न लकारयुक्तोच्चारः । व्यसोः पविचमसीति कण्डिकायां ह्वार्षीत् अत्रापि प्राक्सैकारोच्चारः ह्वारेषीत् । षकारस्योदाहरणमेव सकारस्य तत्कथं "आदेशप्रत्यययोः" । इण्कवर्गाभ्यां परस्य मूर्द्धन्यादेशइति ज्ञात्वा रेफस्तु इणमध्ये वर्त्ततें तर्हि रेफात्परो यः सकारः स मूर्द्धन्यएवेति ज्ञात्वा षकारसकार-

योरेकमेवोदाहरणम् । आर्ष्यां संहितायां तृतीयाध्याये प्रथमर्चि बर्हिषे त्वा बर्हिरसीत्यनयोर्बरेहिषे त्वा बरेहिरसीत्येवमेवोच्चारो न तु सोर्ध्वरेफोच्चारः । चयोविंशत्यध्याये "केष्वन्त इत्यङ्मध्ये "एतद्ब्रह्मन्नुपवल्हामसीत्यत्र वलेह्रामसीत्युच्चारो रलयोः सावर्ण्यात् एवमादीनि ज्ञेयानि । ह्रस्विह्रीनेति किम् । व्वसोः प्रवित्रमसीति कण्डिकायां "यज्ञपतिर्ह्वार्षीत् ॥ एकविंशत्यध्याये नाव्भ्याऽआसीदन्तरिक्षꣳ शीर्ष्णोद्यौरित्यत्र हकारषकारयोर्वकारणकारह्रस्युक्तत्वाद्ऊर्ध्वरेफयुक्तएवोच्चारो न प्राक्सैकारोच्चारइति । श्लीति किम् । इषे त्वोर्ज्जे त्वा प्रार्ष्यस्यतु इत्यत्र श्लिविह्रीनत्वात्सोर्ध्वरेफोच्चारो न प्राक्सैकारोच्चारइत्यादि सर्वत्र ज्ञेयम् । इति चतुर्थसूत्रव्याख्या । एतदर्थे कारिकाऽपि । षष्ठोच्चारः खकारः स्याद्रुं विना छन्द्सि खके ॥ विह्रलग्ल्यूर्ध्वरेफो यः सैकारः प्राक्समुच्चरेत् ॥ ४ ॥

अनुस्वारस्य ऊं० शलि रेफे च परे ह्रस्वाद्दीर्घो दीर्घाद्ध्रस्वः सँय्योगे गुरुश्च ॥ ५ ॥

पदान्तमध्ये शलि रेफे च परे अनुस्वारस्य ठं० स्याद्ध्रस्वाद्दीर्घो दीर्घाद्ध्रस्वः संयोगे च परे गुरुः स्याच्छ-

न्द्रसि माध्यन्दिनीये। उदाहरणानि यथा । विर्ठ० श्न-
द्वामेति । ब्राह्मणेऽपि सर्वर्ठ० षडिति । द्वितीयाध्या-
ये अग्ने गृहपतऽइति कण्डिकायां भूयासर्ठ० सुगृह-
पतिः । तस्यामेव शतर्ठ० हिमाः । तृतीयाध्याये स-
न्त्वमग्नऽइति कण्डिकायां सम्प्रजया सर्ठ० रायस्पोषे-
णेति । प्रथमाध्याये पृथिवि देवयजन्योषद्यास्ऽइत्यृ-
ङ्मध्ये पृथिव्याए शतेन पाशैः । द्वादशाध्याये सुप्र-
र्णोसीति कण्डिकायां यजूएषि नाम । द्वितीयाध्याये
एषा तऽइत्यृङ्मध्ये ससृवाएसँव्राजजितम् । सम्बर्हिर-
ङ्क्ताए हविषा । तृतीयाध्याये उभा वामिति क-
ण्डिकायां दृषाए रयीणाम् । एकविंशत्यध्याये होता
यक्षत्सुरेतसन्दृषमभित्यृङ्मध्ये सुरया भेषजए श्रिया
न मासरम् । अष्टादशाध्याये आयुर्यज्ञेनेत्यृङ्मध्ये
कल्पताए योचँय्यज्ञेन कल्पताम् । एकादशाध्या-
ये दएष्ट्राभ्यामवलिम्लून । एकोनविंशतिमेऽध्याये पु-
रोडाशैर्हवीएष्या । तृतीयाध्याये सोमानए स्वरणम् ।
सन्त्वमग्नऽइत्यृङ्मध्ये सन्दृषीणाए स्तुतेन । पञ्चमा-
ध्याये सिएच्यसि । एवं रेफसँय्योगे परे ज्ञेयम् । इ-
त्यादिषु क्रमेण दीर्घह्रस्वगुरूच्चाराः कर्त्तव्या न व्यस्ता-
इति । शलि रेफे च परे किम् । इन्द्राय भागं प्रजाव-
तीरित्यनयोरनुस्वारस्याग्रे शल्रेफाभावादनुस्वार ए-

व न ठ० कारइति पञ्चमसूत्रं व्याख्यातम् । सूत्रार्थे कारिकाऽपि । अनुस्वारस्य ठ० वेदे शलि रेफे परे भवेत् ॥ ह्रस्वाद्दीर्घो दीर्घाद्ध्रस्वः सँय्योगे च परे गुरुः ॥ ५ ॥

शर्पूर्व्वाणामृद्धीनकादिपञ्चवर्गाणां द्वित्वं विसर्गाद्रेफयुक्तानाम् ॥ ६ ॥

पदान्तमध्ये शर्पूर्वाणां ऋकारहीनकादिपञ्चवर्गाणां विसर्गात्परेषां रेफयुक्तानामेषां च द्वित्वं स्याच्छन्दसि माध्यन्दिनीये ॥ शर्इति शषसा ज्ञेयाः । उदाहरणानि यथा । द्वितीयाध्याये अस्क्कन्नमद्य देवेभ्यः । आधत्तेति मध्ये पुष्क्करस्रजम् । समिदसीत्यङ्मध्ये कस्याश्चिदभिशस्त्यै। कृष्णोऽस्याखरेष्ठः । सूर्य्यस्त्वा पुरस्तात्पातु । उपक्रुतो द्यौष्पितोपमाम् । मयीदमित्यङ्मध्ये दधात्त्वस्मान् इत्यादिषु कादिपञ्चवर्गाणामेव द्वित्वं शर्य्युक्तत्वान्न शषसानां विसर्गाद्रेफयुक्तानामुदाहरणानि यम्परिधिमित्यस्याष्टचि मध्ये अग्नेः प्रियमस्या अग्निमकण्डिकायां बृहन्नः प्रस्तरेष्ठाः। तृतीयाध्याये आ नऽएतु मनः पुनः क्रत्वे दक्षाय जीवसे । ऋकारहीनत्वादिति किम् । तृतीयाध्यायेऽष्टादशकण्डिकायां व्यस्कृतं सहस्कृतम् । चतु-

र्विंशत्यध्याये द्वितीयकण्डिकायां बार्हस्पत्यः पृषतीति द्वितीयाध्याये द्वितीयर्च्चि ऊर्णम्रदसन्वा स्तृणामीत्यत्र ककारपकारतकाराणां ॠटकारयुक्तत्वान्न द्विन्त्वमित्यादि ज्ञेयम्। एतदर्थे कारिकापि। व्यृकादयः पञ्चवर्गाः शर्पूर्वा गुरवश्च ते॥ विसर्गाश्च परे तद्वद्युक्ताश्छन्दसि स्मृताः॥ ६॥ अरादिज्ञापनार्थं प्रत्याहारसूत्राणि लिख्यते। तथा च। अइउण्। ॠऌक्। एओङ्। ऐऔच्। हयवरट्। लण् ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठथचटतव्। कपय्। शषसर्। हल्। इति माहेश्वराणि सूत्राणि णादिसञ्ज्ञार्थानि। एषामन्त्या इतः। हलन्त्यम्। उपदेशेऽन्त्यं हलित्स्यात्। आदिरन्त्येन सहेता। अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च सञ्ज्ञा स्यात्। यथाऽणिति अइउवर्णानां सञ्ज्ञा। एवमच् हल् अलित्यादयः प्रत्याहारा ज्ञेयाः। कस्य वर्णस्य पुनः किं स्थानमित्यपेक्षायामाह। अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। ॠटुरषाणां मूर्द्धा। ऌतुलसानां दन्ताः। उपूपध्मानीयानामोष्ठौ। ञमङणनानां नासिका च। एदैतोः कण्ठतालु। ओदौतोः कण्ठोष्ठम्। वकारस्य दन्तोष्ठम्। जिह्वामूलीयस्य जिह्वामूलम्। नासिकाऽनुस्वारस्य। अचः स्वराः। ४क-

इति जिह्वामूलीयः । ५ पदुत्युपध्मानीयः । अं इत्यनुस्वारः । अः इति विसर्जनीयः इति ज्ञेयम् । पाणिनीयसूत्रे अपि द्वित्वविधायके भवतः । तथाहि । अनचि च । अचः परस्य यरो द्वे वा स्तो नत्त्वचि । अचो रहाभ्यां द्वे ॥ अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वास्तः । पाणिनीयद्वित्वसूत्रद्वयोदाहरणानि प्रथमाध्याये द्वितीयर्चि पृथिव्यसि मातरिश्वनो घर्मोऽसि विश्वधाऽसि । दृढ० हस्त माद्वार्ष्णो ते इत्यादि सर्वत्र ज्ञेयम् । इति षष्ठसूत्रव्याख्यानम् । एतदर्थं कारिकाद्वयमपि । पाणिनीयस्य सूत्राभ्यां द्वित्वं सर्वत्र कीर्त्तितम् । ऋटं विना कादयः पञ्च ग्पूर्व्वा द्वित्वमाप्नुयुः ॥ ७ ॥ विसर्गोच्च परे ते रेफयुक्ताश्छन्दसि स्मृताः ॥ पाणिनीयप्रातिशाख्यसूत्रैर्द्वित्वं प्रकीर्त्तितम् ॥ ८ ॥

न सोऽयोइच ॥ ७ ॥

पदान्तमध्ये वकारयकारयोः परयोः सकारस्य द्वित्वं न स्याच्छन्दसि माधयन्दिनीये । उदाहरणानि यथा । द्वितीयाध्याये द्वितीयर्चि स्तृणामि खासस्त्थाम्नुवपतये स्वाहा । प्रथमाध्याये ग्मर्म्मास्यवधूतर्ठ० रचः । धृष्टिरस्यग्ने इत्यादिषु सकारस्य यवयोः परयोर्न द्वित्वम् एवं सर्वत्र ज्ञेयम् । इति सप्तमसूत्र

व्याख्यानम् ॥

हल्युतायुतस्योः सैकारश्च ॥ ८ ॥

पदान्तमध्ये हल्युतायुतस्य ऋकारस्य ऋवर्णस्य सैकारइवोच्चारः स्याच्छन्दसि माध्यन्दिनीये। उदाहरणानि यथा द्वितीयेऽध्याये कृष्णोऽसीत्यत्र क्रेष्णोऽसीत्युच्चारो न ऋकारः। अग्नये इत्यृङ्मध्ये पित्रमते इत्यत्र पित्रे मते स्याच्चेत्युच्चारः। तृतीयाध्याये अयन्ती योनिर्ऋत्वियइत्यृङ्मध्ये रेत्वियइत्युच्चारइत्यादि सर्वत्र ज्ञेयम्। इत्यष्टमसूत्रव्याख्या सूत्रार्थे कारिकाऽपि। यवयोः परयोः सत्य द्वित्वं न स्यात्तु छन्दसि॥ ऋकारो हल्वियुग्युग्वा सैकारश्छन्दसि स्मृतः ॥ ९ ॥

ह्रस्वं किञ्चिद्दीर्घं हल्युताकारे हल्विसर्गयुग्वर्णे च न संहितायाम् ॥ १० ॥

पदान्तमध्ये च ह्रस्वत्वस्य किञ्चिद्दीर्घोच्चारः स्याद्धल्युतायुत आकारे परे हल्विसर्गयुग्वर्णे च परे न स्याद्वाजसनेयसंहितायाम्। अस्योदाहरणानि यथा संहितायां प्रथमाध्याये प्रथमर्चि इषे त्वोर्ज्जे त्वा वायवस्थ देवो वइत्यादिषु इकारयकारस्याकारा ह्र-

स्वाः । अत एषां किञ्चिद्दीर्घोच्चारो न तु ह्रस्वता । सविताऽत्र तकारहल्युत आकारोऽग्रे तिष्ठति । अतः सकारविकारयोर्ह्रस्वतैव । दृढं०हस्व मा ह्वार्मीते । प्रार्प्यतु । अत्र पकारयकारयोः किंचिद्दीर्घता । श्रेष्ठतमाय अत्र मकारयुतआकारो ऽग्रेस्ति । अतः टकारतकारयोर्ह्रस्वतैव । अत्र यकारस्य किञ्चिद्दीर्घता । कर्म्मण ऽआप्या । अत्र मकारणकारयोर्हल्युताकारोऽग्रेऽस्ति । अतो ह्रस्वावेव । यङ्गमग्दन्या अत्र ध्वस्य कीञ्चिद्दीर्घता । इन्द्राय भागं प्रजावतीः अत्र यकारमकारयोरग्रे हल्युत आकारोऽग्रेऽस्ति अतो ह्रस्वावेव । वस्य किञ्चिद्दीर्घता । रनमीवाऽअयक्ष्मा मा वस्तेनऽईशत इत्यादिषु रेफनकाराकाराणां किञ्चिद्दीर्घोच्चारः । ईशत मा" अत्र हल्युत्तरआकारोऽग्रेऽस्ति । अतः शतयोर्ह्रस्वतैव ॥ माऽघशर्ठ० सो ध्रुवा ऽअस्मिन्गोपतौ स्यात बह्वीः । अत्र घकारपकारतकारणां किञ्चिद्दीर्घता । यजमानस्येत्यत्र मयुतआकारोऽग्रेऽस्ति । अतो ह्रस्वतैव यजयोः स्यस्य च किञ्चिद्दीर्घता पशून्पाहि । अत्र पकारहिकारयोः किञ्चिद्दीर्घोच्चारः । द्वितीयाध्याये मित्रावरुणौ त्वोत्तरतइत्यत्र वकाररुकारयोः किञ्चिद्दीर्घता । तकाररेफयोर्हल्विसर्गयुग्वर्णोऽग्रेऽस्ति । अतो ह्रस्वतैव न दीर्घोच्चारः ।

प्रतिज्ञासूत्रे "ईषद्दीर्घता च भवति" । एकमात्राकालापेक्षया किञ्चिदधिककालउच्चारणीयः सार्द्धकमात्रिकः कालइत्यर्थः । अतएवार्ष्यां संहितायां दीर्घपाठेऽमुकोऽध्यायइति लिखितमाचार्य्यैः । इत्यादि सर्वत्र ज्ञेयम् ॥ सूत्रार्थं कारिकाऽपि । ह्रस्वं दीर्घं भवेत्किञ्चित्संहितायां परो न चेत् ॥ हल्संयुतायुताकारश्चावर्णो हल्विसर्गयुक् ॥ १० ॥ नवानामपि सूत्राणां षण्मिताः कारिकास्त्विमाः ॥ केशवेन कृतास्ताः स्युर्वेदाध्ययनबोधिकाः ॥ ११ ॥ परिभाषाङ्कसूत्रं च याजुर्वेदं सकारिकम् ॥ दैवज्ञकेशवेनेदं कृतं हलसरान्वितम् ॥ १२ ॥ ह्रस्वोदात्तादिभिर्भेदैः सहस्वरलक्षणम् ॥ शिक्षादिभिः षडङ्गैश्च विज्ञेयं वेदपाठकैः ॥१३॥ इति श्रीदैवज्ञकेशवकृता प्रतिज्ञासूत्रानुसारिणी केशवीशिक्षा समाप्ता ॥